# Shri Shankaraprapatti Stotram

## શ્રીશઙ્કરપ્રપત્તિસ્તોત્રમ્

## Document Information

Text title : Shri Shankaraprapatti Stotram

File name : shankaraprapattistotram.itx

Category : shiva, shivarahasya, prapatti, stotra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 21| 174-192||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# શ્રીશઙ્કરપ્રપત્તિસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
યત્પાદપદ્મં નિગમાન્તવેદ્યં
યત્પાદપદ્મં મુનિવૃન્દવન્દ્યમ્ ।
યત્પાદપદ્મં વિધિવિષ્ણુમૃગ્યં
તત્પાદપદ્મં શરણં વ્રજામિ ॥ ૧૭૪॥

યત્પાદપદ્યામ્બુજમાદિવિષ્ણુઃ
સ્વનેત્રપદ્મેન મનોહરેણ ।
સમર્ચાયામાસ તદર્ચનેન
સૌભાગ્યમુક્તિ સુલભેન લપ્સ્યે ॥ ૧૭૫॥

યત્પાદપદ્મામ્બુજરેણુમિષ્ટં
મુકુન્દચન્દ્રેન્દ્ર ચતુર્મુખાદ્યાઃ ।
સમર્ચયન્ત્યન્વહમાદરેણ
તત્પાદપદ્મં શરણં વ્રજામિ ॥ ૧૭૬॥

યન્નામસઙ્કીર્તનમેકમેવ
વિનાશયત્યાશુ મહાઘસઙ્ઘમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૭૭॥

યન્નામમાત્રોચ્ચરણેન સદ્યો
ધન્યા ભવન્ત્યેવ હિ પાપિનોઽપિ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૭૮॥

યન્નામ દેહક્ષયપૂર્વકાલે
સ્મૃતં દદાત્યેવ હિ મોક્ષમેકમ્ ।
તં દેવમીશં શરણં વ્રજામિ

બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૭૯॥

યન્નામતત્ત્વં ન વિધિર્વિદેદ
યન્નામતત્ત્વં ન વિવેદ વિષ્ણુઃ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૦॥

યન્નામતત્ત્વં ન વિવેદ વેદો-
ઽપ્યનન્તશાખઃ સકલસ્વરૂપઃ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૧॥

યન્નામસંસારસમુદ્રમુદ્રા-
વિદ્રાવકં સર્વભયાપહારિ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૨॥

યન્નામદિવ્યામૃતપાનસક્તા
નિન્દન્તિ દેવાનપિ વિષ્ણુમુખ્યાન્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૩॥

યન્નામપીયૂષમપીય મૂઢા
ભવન્તિ સંસારસમુદ્રમગ્નાઃ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૪॥

યન્નામ ગોકોટિસહસ્રકોટિ-
પ્રદાનપુણ્યાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૫॥

યન્નામ યાગાયુતકોટિકોટિ-
સહસ્રપુણ્યાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૬॥

યન્નામ મત્તોન્નતદન્તિકોટિ-
પ્રદાનપુણ્યાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૭ ॥

યન્નામ રત્નોન્નતકોટિકોટિ
તુલા પ્રદાનાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૮ ॥

યન્નામ શુભ્રોત્તમવાજિકોટિ-
પ્રદાનપુણ્યાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૮૯ ॥

યન્નામ સન્તપ્તસુવર્ણકોટિ-
કોટિપ્રદાનાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૯૦ ॥

યન્નામ કન્યાજનકોટિકોટિ-
પ્રદાનપુણ્યાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૯૧ ॥

યન્નામ સસ્યાવૃતાસર્વપૃથ્વી-
પ્રદાનપુણ્યાધિકપુણ્યપુણ્યમ્ ।
તં દેવમીશં શરણં વ્રજામિ
બ્રહ્મેન્દ્રવિષ્ણ્વાદિસુરૈકવન્દ્યમ્ ॥ ૧૯૨ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શ્રીશઙ્કરપ્રપત્તિસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૧ । ૧૭૪-૧૯૨ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 21 . 174-192..

Proofread by Ruma Dewan

*Shri Shankaraprapatti Stotram*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*